M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Rel.
Ser. 498

Title: Nalodayakhya
Kavyartha Dipika

498

नलोदयाख्य काव्यार्थदीपिका

Incomplete

		Nalodayakhyakavyartha	Title
		Deepika by	Author
		Rāmadeva Ganeshadeva	Editor
		son of Ramadeva	Year, Vols.
			Publisher
498		Ends abruptly	Remarks

श्रीगणेशाय नमः॥ प्रणम्य विघ्नहंतारं भारतीं च तथा गुरून्। नलोदयाख्यकाव्यस्य क्रियतेऽर्थप्रदीपिका
१ ॥१॥ तत्र तावद्ग्रंथकृत प्रारिप्सितस्य ग्रंथस्य परिपंथिनिराकरणस्वाभिमतदेवतायां कृत्स्ने मनःसमाधान
लक्षणं मंगलमाचरति अन्वयव्यतिरेकाभ्यां प्रतीयते च ननु नायं नियमो यन्मंगलादेव ग्रंथसमाप्ति
प्रचयाविति। अन्वयव्यतिरेकाभ्यां न विनयस्य कलनाकादंबर्यादिमीमांसाभाष्यादौ व्यभिचारतः।
मैवं। प्रणामादेवैशिष्ट्येऽन्यथानुपपत्तिः समाप्त्यसमाप्त्योर्हितकर्तृकेन॥ ॥हृद्यसदाया
दवतः पापाट व्याद्दुरासदायादवतः॥ श्रीरसमुद्भवा पादवतस्त्रिजगन्मा मागाः स्मरेण दायादवतः॥१॥
॥ ॥अत्र चाश्वाससमाप्तेऽव्यपेतयमकपदं सर्वत्र यमकपदानामव्यवहितत्वात्तद्वांतरभेदोऽपि
तुष्पदामभिन्नयमकभेदो विज्ञेयः चतुर्भिः कालापकं॥ हृद्य सदाय दुकुलजन्मनो हरेः मा भंगाः न १
निवर्त्तेथाः। यादवत इति पंचम्यर्थे तस्। तमेव विशेषयति। दुरासदायाः दुर्गमायाः पापाट व्याः वन

क्रपणाम सहिताः नराः भवभाजः संसारगामिनो न स्युः पठितानि संति पापहारीणि नामानि गोविंदमुकुंदा
२ दीनि यैस्तेऽपि भवभाजो न स्युरिति संबंधः॥३॥ ॥समनिंदानवनाशं जनतालिकुलं यथैव दानवना
शं। द्विरदाद्दानवनाशं जगद्बलं भते यतः सदानवनाशं॥४॥ ॥समे निंदानवने निंदास्तुती यस्याः
सा जनता जनसमूहः योगिन इत्यर्थः सा यतः यस्माद्धरेः शं सुखमपवर्गलक्षणं लभते। अलिकुलं
भ्रमरपंक्तिः यथैव द्विरदात्करिणः दानधनस्य मदोदकस्य अशनं अशः पानं लभते तथैव शं लभत
इत्यन्वयः। यतः ऊगद्ध। दानवनाशं दैत्यक्षयं लभते सदा निरंतरं कथं न विद्यते अवनस्परक्षणा
स्य आशा आइ क्षाय या भवति तथा तस्मान्मा गाइ इति संबंधः॥४॥ एवं हरिं मानसनमस्कारेणास
लभ्यैतत्काव्य[illegible]कामपितारं राजानं वर्णयति सार्धैश्चतुर्भिः॥ ॥अस्ति स राजा नीतैरामारवो २
यो गत्तीः परां जानीते। यस्यैः राजा नीतीः रत्नानि जनैः कुलैर्धराजानीते॥५॥ स रामारव्यो राजाऽ

द्रवतः। दारुकाग्नेः॥ अरिसमुदायाद्वैरिसंघातात् त्रिजगत् त्रिलोकीमवतः रक्षतः॥ स्मरेण्दायदवतः॥ पुत्रवतः
दायादो पुत्र बांधवो इति॥१॥ ॥योजनि नागो पीतश्चचार यो बल्लवांगनागोपीतः॥ यो येन गो
पीतः कंसाद्यो द्वेषमेव ना गोपीतः॥२॥ ॥यः ना पुमान् पीगोतः गोपो नंदस्तस्य भार्यायाः यशो
दायाः सकाशादजनि। तत्पालितत्वात्। दीपजनेति कर्त्तरि णिच्। यद्वा गां भुवं पाति स गोपो वसुदेवः त
द्भार्यायाः देवक्याः। यः बल्लवांगनाभिर्गोपीभिर्गोभिर्दृष्टिभिः पीतः सादरमवलोकितश्चचार। येन भूर
गोपि रक्षिता। यद्वा इतः अस्मात्कंसाद्द्वेषमेव इतः प्राप्तः इति न। अपराधमपि इतः येन कृतापराधः
२॥ ॥यदरिषु सन्नामानस्थितयो यन्नुन्नमुदलसन्नामानः। यत्र ससन्नामानः स्युर्भविभा
जोऽम्भपठितसन्नामानः॥३॥ ॥यद्वैरिषुवर्त्तमानाः अहंकारस्थितयः सन्नाः शीर्णाः यन्नुन्नं
येन प्रेरितं अनः शकटं उदलसत्। ऊर्ध्वमगमत्। नाम प्रसिद्धं यत्र यस्मिन् ससन्नामानः सम्य

क्ति इत्यन्वयः॥ यः नीतेः परागतीः जानीते नयपरां महतीं गतीर्मार्गान् जानीते। अनीतेः ईतिरहितस्य यस्य कु
ले जनः रराज। ईतयो नाम राष्ट्रोपद्रवाः ताः न विद्यंते यस्येत्यनीतिस्तस्य। सदा धरा जानि भूमिः समुत्पन्ना
भिरत्नानि सस्याश्वगजादीनि नीते प्राप्ते॥५॥ ॥यः सनानावारिप्रकरनदीः शरमयं घनानावा
वारि। अतरन्नानावारिव्यसनैर्घनं पि द्रुविवनं वनानावारि॥६॥ यो सैनापुमान् सेनैव नौस्तरणिस्तया तृ
ता अरिप्रकराः शत्रुसमूहाः त एव नद्यः ताः अतरत्। तीर्णाः। शरमयं बाणरूपं वारि घनानानां कृपयं तयः
वहंत्यः। रूपकमिदं उपमाया द्योतनतिरोभूतत्वात्। यः नाव्यसनैः दूरतमद्यादिभिः सप्तभिर्नावारि। य
द्रुविवनं नयद्देशो वनं वनानावारि विविधगृहबंधनयुक्तं तद्वने गजाः मिष्यप्यसं ते इत्यर्थः वारिर्गजबं
बंधनमिति॥६॥ ॥अपि यो दायादा यस्य प्रदोहस्सितांय दायादायः॥ कस्मादायाः दायश्रि
याश्रिरधिराजममसिगदायादायः॥७॥ ॥यः अहसि पापे सति दायादायापि पुत्राभ्यापि स्यमप

३ दः। यस्य आयामाद्धनात्सतामायः धर्नं तद्धनेन धनिनो जाता इत्यर्थः। अधिराजं राजाहः स विभ्यस्तद्रदत्य
दंत। प्रतिनृपं करमादायादाय स्वीकृत्य स्वीकृत्य अधिक्षेप पदस्थे द्विरुक्तिः। पयः श्रियो ब्धिः समुद्रः
अब्धिसाम्यं श्री निलयत्वात्। एकत्र संपदः अन्यत्र लक्ष्म्याः। असयः खड्गाः गदाः प्रहरणविशेषाः
ताएव यादांसि यत्र क्रूरकर्मत्वात्खड्गादीनां यादःसाम्यं॥७॥ ॥ अतिदूरराजादित्याश्रि
तात्पभेदैव भूः सराजादित्या। येन सराजादित्यात्रिदिवात्संयुक्त शत्रुसराजादित्या॥८॥ ॥
येन भूः त्रिदिवात्। आश्रितात्पभेदैव प्राप्तेषद्भिन्नातैव कथं भेदः। अज्ञातब्रह्मणः। अज्ञादेवाति
दूरा इति ब्रह्मणः समीपवर्ती स्वर्गः भूमिरतिदूरस्थितेति भेदः। नाना इति साम्यमाह। सहराजादित्य
नाम्ना रामभ्रात्रा वर्तत इति भूविशेषणं। त्रिदिवविशेषणं तु। सह राजादित्यात्। उभयोः शत्रुतः सा ३
म्यं राजा चंद्रः आदित्यो रविः। तत्सहितादिति नार्थतः पुनः किंविधा भूः दित्या खंडनेन संयुक्ताः छि

न्नाः शत्रवः राजानो यस्यां सा अनंता द्वद्वश्रीहेर्डीत्प्रत्ययः। येन रामेण शत्रून्निहत्य निःकंटकीकृतेत्यर्थः। एतद
पि स्वर्गे पिनिः शत्रुकत्वात् भुवः साम्यं। यद्वा राजशब्दो ह्सांतस्तथा च रामविशेषणं। येन द्वाजाक श्रित।८॥ ॥
॥ खलसेनानांविधः स्वांहा श्रीयस्य भुवि नानाविधः। स्निग्धजनानां विघ्नप्रयतेस्य सुकाव्यविरचना नाविघ्न
॥७॥ ॥ यः खलसेनाः दुर्जनसमूहान्न नावेत् नरसेत्। कस्मिन्सति। स्वांहो श्रीस्वपानकसमुद्रे सति॥
खलरक्षणे स्य लोकोपद्रवहेतुत्वात् अरक्षणेन पापमेव भवतीत्यतस्तान् रक्षेत्। स्वशब्दे न तेषामात्मा लक्ष्यते। तदा
तत्र सराजा रामोस्तीति संबंधः पूर्वेण। तस्यास्य राज्ञोर्थे स्निग्धजनान्साधुजनान्। निर्माण एव पुण्यस्य संसा
रनारणा समर्थान्। यद्वा। श्रीवघ्न नमस्कृत्य। सुकाव्य विरचनानां विघ्नाधुना सुकाव्यरचनमेनेनोत्तरणिस्त
स्य प्रयत्नेयत्नं करोमीत्यर्थः॥७॥ ॥ अथ निजराज्यं तेन प्राप्तासि नलेन शत्रुराज्यं तेन। नैषधराज्यं तेन
श्रियादिशो यस्य विहृतिराज्यं तेन॥१०॥ ॥ अथ नलकथां प्रस्तुत्य नलमेव वर्णयन्नाह षड्भिः। अथ राजा

ह्स्य आनंतर्यासंभवमंगलार्थत्वं। उक्तं हि। ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कंठंभित्वा विनिर्यातौ
४ तस्मान्मांगलिकावुभाविति। निजंराज्यंतेननलेन प्राशासि पालितं। शत्रुराजीनां वैरिपंक्तीनामंतेमन्ना
नैरैहितुना। इनश्रिया। इनः प्रभौ दिवानाथ इति। सूर्यवर्चसा दिप्तः अराज्यत। कर्मणिलङ्। यस्य आज्यंते
संग्राममध्ये विहृतिर्भंगोन। १०॥ ॥ मूर्तिमारसमानां योदधाद् आयुःसहस्त्रमारसमानां। रुद्रकुमा
रसमानामजयद्द्विषतांनरराजिमारसमानां॥ ११॥ ॥ यः मारसमानां मदनसदृशीं मूर्तिं दध
त। समानांसहस्त्रमायुः सहस्त्रवर्षमितमायुः आर प्राप। यः रुद्रः शिवः तस्य कुमारः स्कंदः तत्तुल्यानां
द्विषतां पंक्तिमजयत् जिगाय। आरसमानां आसमंतात् क्रंदमानां॥ ११॥ ॥ साश्वनियामानि
यतः श्रेष्ठाविद्यास्तदाश्रयामानयत। अधिकायामानयतः शत्रावपि यस्य धीर्दयामानयतः॥ १२॥
॥ ॥ साश्वनियामाः अश्वनियामाः शिक्षोपलक्षणार्थाः शिक्षासहिताः विद्याः मानयतः मनविज्ञा ४
ने अनतः। यतोनलात् तदाश्रयाः अन्ये विज्ञातारः श्रेष्ठा न भवंति। स तेभ्योप्यधिकतरविद्या इत्यर्थः। नय
ते। नीतेः अधिकायामा अतिविस्तराबुद्धिः। शत्रावपि दयां आनयतः। यतोतिकृपां असकृत्कुर्वतः॥ १२॥ ॥
॥ अहितानामायस्यत्रातार्यः शरणगामिनामायस्य। गतनानामायस्य श्रुतः पितावीरसेननामा यस्य॥ १३
॥ ॥ यः शरणगामिनां अहितानां शत्रूणां आयस्य धनस्य आयस्य प्रयत्नं कृत्वा त्रातार क्षकः। गतनाना
मायस्य गतविविधकपटस्य यस्य वीरसेननामा पिता श्रुतः ख्यातः॥ १३॥ ॥ भुव्यतनोदंतेनद्विष
तांस्यंपुरांसिशोभमानोदंतेन। नीतेनोदंतेनक्षितिमभजन्नहितदंतिनोदंतेन॥ १४॥ द्विषतामंतेनना
शेनत्वोत्सेः भुवियशांसि अतनोत्। वितस्तार। शोभनोदंतेन मंगलिककथनेन तेन नोदं नीता श्रयं प्रापिताः
अहितदंतिनो गजाः दंतेन भूमिमभजन्। अस्पृशन्॥ १४॥ ॥ सविवर्गिरागोपायंनलः सर्व
वीनिरस्तरागोपायां। शत्रोरागोपायंनीत्वा नेमुर्मह त्तरागोपायं॥ १५॥ स नलः निरस्तरागोपायंनिरस्तः

रागस्योपायेंधकारो। यथातथा। प्रधानवावापृथिवीमगोपायत् अरक्षयत्। अभिलाषवतोराज्ञोनथ्येद्राक्षुम
५ संश्रयमिति। किंकृत्वा। शत्रोः आगः अपराधं अपायं नीत्वा। कश्चित् निरस्तरागो पायभिः त्यागो विरोधणामा
ह। तथाव। रागस्यप्रतिरूपायाः सामदानादयो निरस्ताः येनेत्यर्थः। यंमहत्तराः अतिशयेन महांतोद्रावा
गोपाः भूपाः नेमुः नमंतिस्म॥१५॥ ॥ योदंभीमान्यायादधिकोथरिपुर्यमेत्य भीमान्यायात् वि
दर्भिमान्यायात्रिजगातिकन्या भीमान्न्यायात्॥१६॥ ॥ एवंनलं वर्णयित्वा दमयंती अन्माह। यः
अदंभी दंभरहितः सन्। मनु अवबोधने। मानं ज्ञानं तद्युक्तः। अभिमानी वा आयाद्धनादधिकः धनाढ्यः
यमेत्यप्राप्य रिपुः भीमान् भयसहितः यायात् गच्छेत्। एवंभूताद्भीमाद्राज्ञः सकाशाद्वैदर्भ्युः दमयंती क
न्याबभूव। न्यायाद्धर्मतोलब्धपत्न्यां। याजिनगतिमान्याश्रेष्ठा। अथानंतरं नलजन्मनः॥१६ ॥ ५
॥ महितंतमारंभाभिर्दमयंतीसदृगुमारंभाभिः। दधतीमारंभाभिर्वृद्धैरोरुद्वयेसमारंभाभिः॥१७॥
रमा

॥ प्रद्युतमक्रीडाकौतुकाढ्यारंभाभिः वृद्धा। आरभ्यत इत्यारंभा आकृतिः उमापार्वती रमालक्ष्मीः रंभाअप्स
राः ताभिः सदृक् सदृशी सौभाग्यसौंदर्यकामशास्त्रादिकौशल्यगुणेत्यर्थः। भाभिर्दीप्तिभिः मारंमदनं दध
ती। पुष्णातीति ददतीतिवापाठः। ऊरुद्वयविषये रंभाभिः कदलीभिः समामृदुत्वात्। इत्थंभूतासावद्धेद्वि
माप॥१७॥ ॥ सारत्नंनारीणांनलः श्रियामजनिनिलयनंनारीणां। यस्यानन्वारीणांमरुभुवमा
पद्धुर्यवनंन्नारीणां॥१८॥ ॥ सादमयंती नारीणांरत्नंसमजनिश्रेष्ठाजा। तथास्वरत्नंस्वजातिश्रे
ष्ठेवेति। रत्नंमणिपाप्रकृष्णयोरिति। नलः मारीणांरैनैसंबंधीनां सामुद्रिकलक्षणोक्तानां श्रियांनिलयन
माश्रयोजनि। यस्यअरीणांघटा। संघः अनन्ता अन्तरहिता। रीणां। अरिङ् क्षरणे। रिक्तां भूत्वांम
रुभुवमापत् आप। मरुनामाभिजलदेशविशेषः। अवनंरक्षणं नप्राप। तिर्संबंधः। अनेनपरस्परानुगु
णालंकथितं॥१९॥ ॥ चक्रमेसाराजन्यश्रेष्ठंतंतासतिअसौराजन्यः। आत्वविसाराजन्यश्रियोधितया

योजितोः स तेजसा राजन्यः ॥१८॥ ॥ तं राजन्यश्रेष्ठं सा दमयंती चकमे । अभिललाष । तां स च कमे । येन
६ लसत्तेजसा राजन्य । विराजमानः । जन्यश्रियः युद्धशोभाः अधित दधार । बंधुसंपदः अपुष्णाद्धा । अन्या
बंधुजनान्स्त्रया इत्यभिधानात् । आत्तविसाराः स्वीकृतविस्ताराः यया दमयंत्या सत्या राजश्रेष्ठयुताः
जन्यः वरस्त्रियः जिताः । तथा च । जनीवधूस्त्री पत्न्यां च इति ॥१९॥ ॥ नोदितीर्णो ध्यानेन प्रभावि
हीनेन शोभमानो ध्यानेन । स्मरजानीर्ध्यानेन स्फुटं भीतिं गतिमिह नलो तनोद्ध्यानेन ॥२०॥ ॥
इतिनिश्चित्ते निधाय नलः गतिं प्रयाणं अतनोत् चकार । यानेन वाहनेन । इति कथं । अनेन इनप्रभा
विहीनेन सूर्यतेजोहीनेन शोभनेन ध्यानेन नः अस्माकं स्मरजा आर्तिः पीडा न नोद्येति न । अपितु नोद्ये
व निवर्त्तनीयैव । अत्र अधनेति विचिंत्य ध्यानं प्रत्यगमदिति संबंधः ॥२०॥ ॥ सो हितं तं हंतापततः ६
कांश्चिदुपवनाद्धितायहंतापततः । स च नहंतापततस्तान्यदमीतोषमावहं तांस्ततः ॥२१॥ ॥ स नल

स्तत्रोपवने स्थितः । अहितहं तो वैरिनिर्दलनः कांश्चित् पततः पक्षिणः अपश्यत् । किंभूतान् । हिताय आपततः
आगच्छतः । तेषां त्वागमनं विधिवशाद्दमयंती संयोगलक्षणाहिताय । अन्यच्च । संतापेन ततः व्याप्तः पीडि
तः सस्नेहं प्रीतिसहितं । ततः कारणात्तान् आप अगच्छत् । यतः यस्मात्कारणात् । अमी पक्षिणः तोषं संतो
षं आवहंत ॥२१॥ ॥ तं तरसा [illegible] नः स विहंगगणो ब्रवीत्ससारसमानः । गतहिंसारसमा
नः कदलेभ्यो निष्क्रियः स्वसारसमानः ॥२२॥ ॥ तं नलं तरसा वेगेन रसमानः क्रंदमानः स विहं
गगणः अब्रवीत् । किंविधः । सारसैः पक्षिविशेषैः सह मानो गर्वः तेन सह वर्त्तत इति । सारसेभ्यो वयमति
सुंदराः इति गर्ववान् । कथमुवाच । हे गतहिंसा रसहे गतहिंसा प्रीतेनल । अस्मान्मा तुद नव्यथय । यतः
स्वसारसमानः । सारो न्यायः स्थिरांशो वबलं श्रेष्ठमिति । स्वबलस्य दृशाः निष्क्रियः विनिमयः तेभ्योऽस्ति । अ
तस्त्वमस्माकं स्वबलसदृशं किंचिदुपकारं करिष्यामः इति भावः ॥२२॥ ॥ तं स्मपके त्वं गत्वाद

धिको भैम्यास्त्वमौतिकेलंगत्वा। सोर्तेकैत्विंशत्वासक्तोललतत्सकाशकेत्वंगला॥२३॥ ॥ अंगदे
८ सरेवनलत्वंझषकेतोरिवांगंयस्य तस्यभावस्तस्मान्मदनसदृशदेहत्वात् भैम्याः अधिकः पतिः अधि
कः काम्य इतिरीतिः। अतस्त्वाइतित्वोस्त्वमः। इति पुनस्तस्या एवांतिकसमीपस्त्वमः स्त्वविष्याम
भविष्यदर्थेवर्त्तमानत्ता। सादमयंती तेइतित्वांक्षिके उत्संगे आसक्ताभिषण्णासती त्वंगतु। कीडत्
वगक्रीडायां। त्वत्सकाशके। स्वार्थेकः। तत्समीपेगत्वाकल विलल्लास। ललविलासे॥२३॥ ॥
॥ इति हंसारामायांनिकटंयोमयकृतेवसारामायां। जग्मुःसारामायांनिजगदुश्च। लिभिरभिससा
रामायां॥२४॥ ॥ यादमयंतीमयकृतामाया मयो दैत्यशिल्पी तेननिर्मिता मायेवसाराम्भूष्टा॥
तस्याः सारामायाः आरामेणसह वर्त्तमानायाः रामायाः स्त्रियः भैम्याः निकटं समीपं हंसाइति। त्वंझषकेतं
गत्वादित्यनेनश्लोकेनोक्तं। जग्मुः निजगदुश्च। यद्वा। यद्वातिरे वक्ष्यमाणेन जपात्निगदुश्च ऊचुः। यावा ८

लिभिः सखीभिः अमासार्द्धं अभिससार अवरत॥२४॥ ॥ श्रीसंकाशास्यस्य त्वं भैमि नलस्य शशिनिका
शास्यस्य। अरिलोकाशास्यस्य स्याय दि भार्या कुमारिकाशास्यस्य॥ २५॥ ॥ कथमूचुः हे भैमियतस्त्वं
श्रीसंकाशा लक्ष्मीसदृशी असि भवसि। अतः अस्य नलस्य यदि भार्या स्याः तर्हि त्वमेवस्याः। नान्येत्यर्थः। त
स्याननार्थं तमेव विशेषयति। शशिनिकाशं चंद्रसदृशं आस्यं मुखं यस्य। अरिलोकेन आशास्यः अर्द्धं
र्थ्यः। अपरा नेयत्तस्यं कुमारिकाभिराशास्योभिलषणीयः। तस्य त्वं लक्ष्मीसदृशी असेगुणैः सर्वाभिरतः
भवतोरूपानुरूपत्वं। अत उचितं भार्यात्वं॥२५॥ ॥ इति हांसेनोदितया गणेन भैम्यां मुदोरसेनोदि
तया। नवभासेनोदितयो स्मरणसपुनर्नलोकसेनादितया॥२६॥ ॥ इत्युक्तप्रकारेण हांसेन गणेन हंस
संघेनोदितया कथयासृत्यामुदा हर्षेण रसेन अनुरागेण उदितया उक्तया उल्लासं प्राप्तया नवभासेदृतिनो
अपितु वभासे एवेत्यर्थः। स्मरणादितया रवंडितया तया पुनः सः हांसोगणः नलोकसेनलस्थानाय अनोदि

प्रेरितः। भवद्भिर्नलस्य स्थानं पुनर्गत्वा एतत्कार्यमिति ॥२६॥ ॥तां बहुधा वायस्याः श्रेण्यः
पुनरस्य सन्निधावायस्य। तां वनिधावायस्य व्यनुवंस्कुल नायनं विबुधा वायस्य ॥२७॥ इति सविना
मानितया जडे भैम्या नलेपि नो मानितया। स्वास्थ्यं नामानि तया शिष्ये विविंस्य तस्य स्वेनामा
नितया ॥२८॥ ॥ता वायस्यः वयसा मिमाः वायस्यः श्रेण्यः तेषां पंक्तयः आपस्य धनस्य निधो अस्य
नस्यैले सन्निधो आयस्य प्रयत्नं कृत्वा बहुधा विविधं तां भैमीं व्यनुवुन्नतुष्टुवुः। यस्य नलस्य लल्नाय
सादृश्याय विबुधाः देवाः नवा वार्थे ॥२७॥ इत्यनेन प्रकारेण विना पक्षिणा मानितया मानं द्रुतया प्रा
प्तया स्वक्ततया भैम्या स नलः हृतः। ना पुमान् मानितया। मानो अभिमानोस्ति तस्य भावः मानिता योपलक्षि
तोपि। उपलक्षणे तृतीया। वेति। वाक्यांतरे स्वास्थ्यं सौख्यं अनितया अप्राप्तया अमयं त्यानाम इति किं
विलक्षस्या नामानि विविंत्य शिष्ये सुप्तं ॥२८॥ अथ स समुद्रागस्य इक्ष्मांतस्यौ लं कृतेः स समुद्रागस्य ॥ ८

यौवनमुद्रागस्यं स्वसुतारत्नस्य सार्द्धमुद्रागस्य ॥२९॥ ॥उत्तरेण युग्मं। स राजा भीमः विधिवत्स्वयंवरं
अतनुतवितस्तार। किं कृत्वा स्वसुतारत्नस्य सार्द्धं श्रमजनितपीडां दृष्ट्वा। तदेव विशिनष्टि। किंभूतस्य समु
द्रागस्य समुद्राः आगाः तैः सह वर्त्तमानस्य भूमांतस्य भ्रांतस्य अलंकृतेर्भूषस्य। रत्नं नाम कस्यचिद्भूषणं
भवति। इदं तु सर्वभूमेः। यौवनस्य मुद्रां मुद्रतां गतस्य। यौवनसंपूर्णत्वं प्राप्तस्येत्यर्थः। रत्नं तु शुक्तिकास्ते
न सिद्धमास्ते। इदं तु यौवनापिहितं। उद्रागस्य उत्कटशृंगारस्य। रत्नपक्षे रागो लौहित्यं। रसेवीर्ये द्रवे रा
गः शृंगारादौ व पारदे इति। कथंभूतो भीमः समुत्सहर्षः द्राक् शीघ्रं ॥२९॥ ॥दद्यौ राजातनुर्न स्व
यंवरं विधिवदीदृशं जातनुतेः। यस्य अजरा जातनुता रथ्यं व्यथा सौजना इरा ज्ञातनुतः ॥३०॥ ॥इंदि
रया लक्ष्म्या कृत्वा जातनुतः प्राप्तवतः। यस्य अजरा जा हृदूत्वजा व्यथा तनुतः शारीरात्स्थकृ। यद्देहेनास्तीत्य
र्थः। स ज्ञौरा भीमः विधिवत्स्वयंवरं अतनुतेति संबंधः। अन्यच्च। असौ स्वयंवरः अतनुनः असमान्या

ज्जनात् अनंगादपि राजशुशुभे। बद्धजनाह्लादेतोः। यद्वा असोभमिः॥ ३०॥ ॥ तं हासेनालिःस्वयं
वरंक्षितिभुजांससेनापालिः॥ विबभासेनापालिस्त्रगेषुतैःशिरस्सियारक्षेनापालिः॥ ३१॥ ॥ तंस्वयंव
रं हासेन कौतुकेन क्षितिभुजामालिःपंक्तिः आप प्राप। सेनापालिभिः सैन्यपतिभिर्दलपतिभिः सहिताः
पालरक्षणोइत्यस्य स्वार्थे णिजंतत्वादजंतत्वेसिद्धं। अवद्धा अजंताद्धातोरिप्रत्ययःस्यात्। ससेना
पालिःतैःरसेन प्रीत्यास्रक्माला अपालिध्वतास्ताएषुःन विबभासेइतिनं। आपितुरेजे। कथंभूता।
अपालिः अपगता भ्रमराणामालयःपंक्तयः वालव्यजनस्य व्यजनपवनैःकृता अपालिः॥ ३१॥ ॥
॥ ॥ तांगांसेनाराजिःस्वर्गसदांयैःसदारसेनाराजि। आयासेनारीजिक्षयितरिपौवलतिविबुधसे
नाराजि॥ ३२॥ ॥ तांगांस्वयंवरभुवंस्वर्गसदांदेवानांसेनाराजिःसेनापंक्तिःआर प्राप। आयासे
नश्रमेणघटितार्थैःयैःसदारसेनवीर्येण अराजि विराजितं। क्वसति। आजिक्षयितरिपौसंग्रामहतवै

रिणि विबुधानां सेनायाःराट् अधिपतिस्तस्मिन्वलतिगतवतिसति॥ ३२॥ ॥ योथपरमहस्तेनप्रा
पिनलोनोत्सवःपरमहस्तेनः। स्फुरितपरमहस्तेन प्रबभौरविरिवोवतत्परमहस्तेन॥ ३३॥ ॥ अथा
नंतरंउत्सवःस्वयंवरःपरमहस्तेन श्रेष्ठकरेण नलेन प्रापिप्राप्तः। किंभूतःउत्सवःपरमहःस्तेनःपरेषां
महसांउत्सवानांस्तेनश्चोरः। अन्योत्सवातिशायिनइत्यर्थः। किंभूतेननलेन। परमुत्कृष्टाःमहस्ताःतेजः
पुंजाःस्फुरिताःपरमहस्ताःयेनसःतेन स्फुरितपरमहस्तेन। तत्परंउत्कृष्टंमहःदिवसःप्रबभौशुशुभे। केनेवरवि
णासूर्येणेव॥ ३३॥ ॥ ×स्फुरित×॥ क्षितलसन्नालीकानाहितेषुसुखेषुंदुतुलितसन्नालीका
नं। राज्ञःसन्नालीकान्कांतिर्विबुधांश्चैनोहसंन्नालीकान्॥ ३४॥ ॥ आहितेषुशत्रुषुक्षिप्ताःलसं
तोनालीकाःबाणाःयेस्तान्। मुखेंदुनातुलितंउपमितंसत्कमनोरमंनालीकं कमलंयेषांतान्राज्ञःवि
बुधांश्चनालीनलस्यकांतिःकान्नाहसत्। अपितुसर्वानेवाहसदित्यर्थः। सन्नंगतंलंअलीकं अप्रियंयेभ्यस्ता

न॥३४॥ ॥अनल्पनिजकलापास्यं तं स्वयशोनिजकं महः किल लोपास्यंतं। शत्रुकलापास्यंतं नीस्यनलं
१० सुरततिः कलापास्यंतं॥३५॥ ॥सुरततिः देवसंहतिः तं नलं वीक्ष्य आलोक्य जलाज्जडा स्तब्धा। अ
जनि जाता। डलयोरभेदः। तद्दर्शनाद्विषण्णेत्यर्थः। नलं विशेषयति। स्वयशः पास्यंतं स्वकीर्तिः पानं
करिष्यंतं वर्णनाकर्णनलक्षणपानं। यद्वा। आत्मकीर्तिं पालयिष्यंतं। तमिति तच्छब्देन देवनिर्देशः
निजकं स्वार्थे कः। देवं महस्तेजः अपास्यंतं निराकुर्वाणं। किल निश्चितं। शत्रूणां कलापाः तत्परिवाः
असयः खड्गाः तेषामंतः नाशकरः। कथंभूतं। कलाः पाति पुष्णातिकलापश्चंद्रः तं तद्वदास्यं मुखं यस्ये
ति तं॥३५॥ ॥स्वर्निलयानाममनलं कृतमपि जेतुं ततिः श्रियानाममनलं। यममजेयानाममनलं शं
क्रः प्रोचे तमभिशयानाममनलं॥३६॥ ॥अजेयानां जेतुमयोग्यानां अरीणां समूहानामनलं अग्निं १०
तद्दाहकमित्यर्थः। तं नलं शक्रः इंद्रः प्रोचे नाम उवाच। नाम वाक्यालंकारे। अयं नलं अनलं कृतमपि अलंकार

रहितमपि स्वर्निलयानां स्वर्गसदां देवानां ततिः संघः श्रिया कांत्या जेतुं अनलं असमर्था। यस्य शरी
रकांतेः जयं कर्तुं देवा अपि न समर्था इत्यर्थः। नलमिंद्र उवाच इति संबंधः॥३६॥ ॥वरदकामायासन्न
स्त्वं भैम्यै यद्गुणाः अमायाः सन्नः। श्रेष्ठतमायाः सन्नः स्वामीशानं तु जन्मनः समायासन्नः॥३७॥ ॥
कथमूते हे नः पुरुषा नरशब्दस्य संबोधनं। नः अस्माकं कामायासं कामो मदनस्तस्यायासं पीडां त्वं
भैम्यै कथय। यद्गुणाः अमायाः सन्तः अभवन्। या श्रेष्ठतमा सुंदरतमा सुरक्षितकन्यांतःपुरे प्रविश
इत्याह। तु पुनः सः जनः दमयंती समीपवर्ती लोकस्त्वां न ईक्षणेन क्षमति। किं कुर्वन्नः अस्माकं मा
यासन्नः सन्मायावृतः सन्॥३७॥ ॥इति सौरे वैकेहास्तं न्यस्य समुकुलं सुरप्रवेके हास्ते। तम
पि वके हास्तं अपतिस्त्रीनत्रं पार्थिवे केऽहास्त॥३८॥ ॥इति सुरप्रवेके देवराजि सरवे शब्दस
हिते सति भाषमाणे सति स नलः हास्तं हस्तरचितं मुकुलं कलिकाकारसंपुटके शिरसि न्यस्य। कीं
११

११ रोनलमारब्धांतमिति। नमस्कृत्येत्यर्थः। तं प्रसह्य हस्तं ऊहाड्गतो ऽगमत्। अविवेकादविचारा
द्वा ईहा चेष्टा अस्त्यात्मकायेन। विवेकव्यापारयुक्त इत्यर्थः। यद्वा। अहं तां वरीतुकामः अस्य दूत्यं
कथं करवाणीत्यविवेकः। यद्वा। अन्यत अन्यत्र तत्र तस्मिन्सति भयति आश्रितेसति। दमयंती
निवासमितिशेषः। इहांतःपुरे काप्यास्त आवर्तत। अपितु कापि नास्तीति काकुः। तद्दर्शनसंभ्रमा
त्सर्वा आविगता इति भावः। अनेन पर्यायेण वनस्थानता कथिता ॥३८॥ ॥ हरिपवमानय
मानां हूतोस्मि महारमानयमानान्। भवंतीमानयमानान्भैमि सुरान्विद्धि महीमिमानयमाना
न्॥३९॥ ॥ हि भैमि। हरिपवमानयमानां इंद्राग्नियमानां दूतो नलोस्मि। पवमानः अग्निः
अपि कनादर्शनेपि पुण्यजोः शानजिति सूत्रेण पुनातीति पवमानः। अग्निरिति गौणत्वात्ख्या
यते। भवंतीमानयमानान् इमान्सुरान् महः स्वयंवरं अयमानान् आगतान् विद्धि जानीहि। पु २२

नस्तत्वरोत्वनाय विशेषयति। रमासंपत् नयो नीतिः मानं श्रितसमुन्नतिः माह्येतोरमानयमानाः येषां तांश्चत
थोक्तान्॥३९॥ ॥ तुल्येप्सरसा देहि प्रभवो मग्नाः स्मरप्रसरसा देहि। तानभिसरसा देहि स्त्रजं त्व
नाकात्सुखं वसरसा देहि॥४०॥ ॥ हे भैमि अप्सरसा तुल्ये उर्वशी रंभादिसमे। अत्र बहुवचनांतत्वे ऽप्य
प्सरः शब्दस्य एकवचनांतत्व प्रयोगो युक्तः। महाकविप्रयोगदर्शनात्। तथाच। गंधर्वराजोप्सरसमभ्य
गादुर्वशीं वरामिति क्षेमेंद्रः। हि यतः कारणात्। देहि प्रभवः देवाः स्मरप्रसरसादे मदनविस्तारखेदे मग्नाः
बुडिताः। अतः त्वं सा तान् अभिसर। स्त्रजं मालां वंदेहि। तत्कंठे निक्षिप। सरस्यात् अनुरक्तात् अमृतसहि
तात् वा। नाकात्स्वर्गात्सुखं च एहि गच्छ प्राप्नुहि॥४०॥ ॥ इति कृतसामोरवतः सुरलोकात्तन्सुरेवने
सोमारवतः। नैरिंसोमारे वतस्वलादिवनलोकमानसामारवतः॥४१॥ ॥ इति तेन्सुरेवेन नलवरते
नरवतः शब्दात्। कृतसाम्ना कृतानुनयासती सादमयंती मारवतो मदनयुक्तात्सुरलोकात्सकाशात् रिरंसा

रंतुमिच्छा रिरंसा तां न आसन प्राप। यतो। नलो कवित्ता कस्मादितो मार वतः निर्जल देशासंबंधिनः स्थलादिव।
१२ नलः कमलं तदुक्त मानसाराजहंसी तस्यायथा तत्र रिरंसा नो प्रद्यते तथा तस्यास्तेत्थिति। नलेवी स्यते मा
मतुल्यरूपवत्वात् ॥४१॥ ॥सा विरा ज्ञोयतया भीष्यदृशा तं स्मरातुरा जायतया। स्थितिरत्री जायतु
यायुक्त सदीवी भाषिनिषधराज्ञायतया॥४२॥ ॥या दमयंती आयतया दृशा दीर्घतया तं नलेने
वीक्ष्य स्मरातुरा अजायत। अभवत्। सा विरराज। अन्यच्च युक्त सदा देवानां अन्त्रस्वयंवरे या अजायत। अ
भार्या वक्त्रनेन्या स्थितिर्वा नी बभाषे कथिता। अत स्तेषां जाया नास्तीति अहं तेषां जाया न भवामीति न
लस्य पुरतः कथितं। इति फलितार्थः॥४२॥ ॥तस्यौ देवाद्यस्य प्रणम्य नलेन धीः परे वाद्यस्य। स
ति निनदे वाद्यस्य स्थाने स्वयं प्रियाया मुदे वाद्यस्य ॥४३॥ ॥अद्य स्यदे वाद्यस्य इस्य पदे वरणे प्र १२
णम्य तस्याः दमयंत्याः धीः बुद्धिः देवा वरणलक्षणा अवादि अकथि वाद्यस्य निनदे सति मंगलार्थं।

एतेन स्वयंवरारंभकालो लक्ष्यते। यद्वेदृस्यनु रे हर्षाय प्रियायाः कथं स्थानं भवात्। गतवान्। तस्य पुरतो वादी
ति॥४३॥ ॥अथ त्तर सारंगेयं न पतिगणोक्त तपदानि सारंगेयं। चंचलसारंगेयं न्दमयंती चासितुलितसा
रंगैव्यं॥४४॥ ॥अथानंतरं सावेगेनन्न पतिगणोयं राजसंघः भंगे स्वयं वरस्थाने पदानि स्थानानि न्यस
त्त चकार। तत्र स्थित इत्यर्थः। पदानि चरणन्यासा इति वा। किं भूते रंगे। चंचलाः सारंगाः भृंगाः यत्र। सुगंध
द्रव्ययुतत्वात् दागमने। किं कुर्वन्। सारं श्रेष्ठं गेयं गीतं। यन्न प्राप्नुवन्। अत वानित्यर्थः। इयं दमयंती
च पदान्यकृत तत्रागता। किं विधा। अक्ष्णा तुलिताः असाम्यं प्रापिताः सारंगा भृंगाः मृगाः वा यस्याः॥४४
॥ ॥अथ धन्वनामान्येषु प्रजानां नृपेषु अभिनिवेश्य नामान्येषु। सूतैर्नामान्येषु प्रकीर्त्यमानेषु शोभनो
मान्येषु॥४५॥ ॥उत्तरेण युग्मं। येषु प्रजाः धन्व नामान्प्रणामान्यर्थ धवि पूर्वको धन्य भत्कु
रित्यर्थः। तेषु एषु मान्येषु राजसु सूतैः बंदिभिः जनैः नाम प्रसिद्धं नामान्यभिनिवेद्य असावमुकनामा अ

मुककुलोद्भवतिइ नामान्युदार्यकीर्त्यमानेषु सत्सु। शोभनादमयंती। अथानंतरं कतिचित्पुरुषानैक्षतेतिसंबंधः
१२ उत्तरेण।४५।। ।।सांगेननलसमानान्नलसमानानथोत्र कतिचित्पुरुषान्। प्रैक्षत नेन नलसमाना
ननलसमानानिभिन्नैतेषांभेदः।।४६।। ।।अंगेननलसमानान्पुरुषान्प्रैक्षत। तादृशान्। अनल
सः अमंदः मानो येषां तान्। नलसमानानितिनः। अपितु नलसमानानेव। अनसले मानान् अभिनतुल्या
नदीनान्। समवेतान्वा इत्थंभूतान्कतिचित्पुरुषान्प्रैक्षत। अन्यत्र इह अन्यत्र इह तेषां भेदो नाभू
त्। एकरूपा एव सर्वे देवाः। अपि नलभ्रांत्या अस्मान्वृणोतीति नलरूपाः।।४६।। ।।सत्याकृत
नासत्यागाः स्फुरतु नलो यदि दिनो सत्यांगाः। अपि दीनोसत्यो गांन्याय्ययुते नैव वर्त्मनासत्यागाः।।
४७।। ।। अथकृनापंचनलेभ्रांतिमतबुद्धिर्भैमी सत्यनलस्फुरणार्थं सुरानर्थयंते द्वाभ्यां। सत्याकृतं १३
नासत्ययोर्दस्रयोः आगः ४ दर्शने ४ अपराधो वा धोयेन। स नलः तर्हि स्फुरतु। प्रकटी भवतु। यद्यहम्

सृत्याः मिथ्याः गाः वाचः न वक्ष्मी नोक्तवती यदि वा सत्यागादानशीलादीनापि दैन्यमापन्नापि न्याय्ययुते नैव व
र्त्मना आगां गतवती।।४७।। यदि वा भावं न्यस्य स्थितास्मिन्नलैरेव नर विभावं न्यस्ये। दिवसभावं न्यस्य द्विपस्य
वपुषो विभावं न्यस्य।।४८।। ।।वाक्यांतरेण। यदि वा इत्यथवा नरविभो नरस्वामिनि नल एव। नान्य
त्रेत्यर्थः। भावं मनोरथं न्यस्य स्थापयित्वा स्थितास्मि तर्हि देवसभा अस्य नलस्य वपुषः देहस्य विभावि
नी विशिष्टभाविनी भवेदिति प्रार्थना। किंभूतस्य नलस्य। अन्यस्य परस्य वन्यस्य गजस्य। परेषां
निर्दलनाय वन्यगजस्येति भावः।।४८।। ।।कृतभावा सा वनितानिति भुवं मैक्षत सुरान्सुवासो व
निता। स्वपतिं वा सा वनिता विद्धं धार्मिकजनेध्रुवो सा वनिता।।४७।। ।। इति प्रकारेण कृतभावा
नलार्पितचित्ता सुवासाः सुवस्त्रा असौ वनिता स्त्री भैमी सुरान्भुवमनिताम् अप्राप्तान्। पद्भ्यां भूमि
मस्पृशन्नित्यर्थः। इत्थंभूतानैक्षत। वा वाचा स्वपतिं नलं भूसहितत्वमेव विद्धं ज्ञापकं यस्य इत्थंभूतमा

लोकयत।धार्मिकजने धर्मयुक्ते जने अवनं रक्षणं तत्र धृतत्वात् निश्चितायहिं। धार्मिको भवतितस्यस
१४ र्वत्र असंकटमेव॥४९॥ ॥स्वरिरंसादेवाल्याव्याकुलदृष्ट्यार्थितासादेवाल्या।वपुषिससादे
वाल्या दृष्टं तं नलमुपस्थितं सदिवाल्या॥५०॥ ॥आल्या आकुलया व्याकुलदृष्ट्या स्वं नलदृष्ट्या
उपलक्षिता सा भैमी बाल्या द्वपुषि ससादे श्रममाप।आल्या सख्या हृत्वा सखीहस्तेन सात्व अनु
रागारिव उपास्थितं समीपवर्तिनं नलं अहृत्तवक्त्रे। देवाल्या देवपंक्त्या अर्थिताया चिता स्वरिरंसा दा
स्येन नाम्ना रिरंसां रंतुमिच्छां ददातीति उत्पादयतीति तथोक्ता॥५०॥ ॥सत्वसदसोमाननं
या रुद्रसमो पः स्वतेजसा सोमानननया।प्रवृत्तः सोमानननयानलो बभौ भुवि गुणेन सोमानेनया॥
५१॥ ॥स नलः बभौ।सत्वसदसः साधुसभायाः माननया पूजनया रुद्रसमः ईश्वरसदृशः ईश्वरो १४
पि सत्वसदसः एज्यः।किंभूतो नलः।सोमानननया वेदसदृशमुख्या अनया द्मयंत्या प्रवृत्तः युक्तः।यास्त्व

तेजसा स्वकांत्या उमानेति न अपितु उमेव पार्वत्येव।अतः शिवयोरिव तयोरुचितः संयोगः पुनरपिकीदृशो
नलः।भुवि गुणेन प्रमानः अमितः। अपरिछेद्य इत्यर्थः।रुद्रोपि तथा॥५१॥ ॥यर अत्यर्थ॥ ॥मददंभा
वरमस्य द्युता तां मनोगुरुप्रभावरमस्य।सुरर्षभावरमस्य प्रदिश्य जग्मुर्गतप्रभावरमस्य॥५२॥ ॥
अरं अत्यर्थं मदः दंभो अस्यास्तिपत्र गर्वदंभरहितं दानं। दानादिलाभेन परावज्ञानं।परवज्ञानं दंभः ते
कसंयहार्थं कपटेन धर्मार्जनं। तद्रहितं मनो ज्ञात्वा सुरेषु ऋषभाः श्रेष्ठाः वरं स्वयामनोरथं दृश्यप्राप्ति
लक्षणं दत्त्वा जग्मुः। अथानंतरं गुरुप्रभावरमे सामर्थ्यलक्ष्म्यो यस्य। गतः प्रभायाः अवरमः उ
पशमो यस्य।अविछिन्नकीर्तेरित्यर्थः॥५२॥ ॥गुरुर्महिमाऽपरमायास्तंभि नल एष सरनमाप
रमायाः।प्रियया भीमोपरमाया स्वपुरमगुर्यन्नतं क्षमापरमायाः॥५३॥ ॥गुरुर्महिमा महामहितः
एषः नलः परमायास्तंभि। वैरिमायाः स्तंभयतीति तथोक्तः वैरिणां दुर्गमामित्यर्थः रमायाः संपदः सदनं स्था

१५ नं स्वपुरं प्रियया अमासार्द्धं आपऔप। यापरमा उत्तमा यत्र पुरे। समापरं सहनशीलं तं आयाः
धनानि आनुआपुः॥५३॥ ॥शशिनासमहासमहानगरे जनतासमहासमहास्त। मुदमपि
भासुरयाव्यहरद्व्यतनोत्सुरयासुरयागमपि॥५४॥ ॥शशिनासमहासमहाः चंद्रसदृश
हास्यतेजाः सा नगरे वर्त्तमाना जनता उत्सवसहिता मुदं समहास्त। उंहाङ्गतो। आप। भासुर
याराजमानया सुरयानेधेन व्यहरत विक्रीडे। सुरयाबैगं देवयजनमपि व्यतनोत। सुरयाअ
तिशयितवेगाय जनकर्मणीति शेषः। अत्र तोटकं छंदः। अन्यत्र स्कंधकं। चतुष्पादं यमकं स
र्वत्र॥५५॥ ॥छ॥ ॥इति श्रीरामदेवसुतगणेशदेवविरचितायां नलोदयार्थस्य
काव्यार्थदीपिकायां प्रथम आश्वासः॥ ॥छ॥ ॥अथ रतिरेकांतेन प्रापि नलेनात्र
मंदिरेकांतेन। तां पुनरेकांतेन प्राप्तवता रिपुमदा तिरेकांतेन॥१॥ ॥अथानंतरं तेन नलेन र १५

तिः क्रीडा प्रापि प्राप्ता। कथं केन। एकांतेन अतिशयेन जनवर्जितदेशेन वा विभक्तेन। अत्र नगरे वर्त्तमाने
मंदिरे क्रीडागृहे। तं विशेषयति। कांतेन सुंदरेण एतावता तां एकांतेन प्राप्तवता। पुनर्निश्चये। तामेवना
न्यामित्यर्थः। रिपुमदस्य अतिरेके ण अतिशयेन अंतेन हत्वा॥१॥ ॥बभौ संसारसागरे श्रका
संसारसार्द्रधीः। मधुः संसार सार वस्तु दास सार सार्त्तवः॥२॥ ॥सारसागरः बलसमुद्रः सः
नलः बभौ रेजे। रसार्द्रधीः अनुरागार्द्रबुद्धिः सा भैमी वक्रास्ते रेजे। तदा मधुः वसंतः संसार प्र
वर्त्तत। सारसानां आरवः आलापः तत्सहितः। ऋतो भवानि आर्त्तवानि पुष्पाणि तत्सहितः॥२॥
॥ ॥समुदधिगता शालीनां करेण कणिशाग्ररुचिजिता शालीनां। दिन भर्त्ता शालीनामिव
१६ नलिनीमपि समुत्थिता शालीनां॥३॥ ॥तं असमयेन वर्णयन्नाह। कणिशाग्ररुचिजिता।
मंजरीप्रभाजितवता करेण जात्येकवचनं। रश्मिना हत्वा आशासु दिक्षु कलीनां तुहिनं निःशेषं नलि

नीत्समुद्रधित उत्थापितवान् कथंभूतामिव शालीनां सव्रीडामिव । यथा कश्चित्प्रोषितः पुनरागत्य विरह
१६ कृशां स्वस्त्रियं करेण धृत्वा उत्थापयति तद्वदिति साम्यं ध्वनितं । अथेति नलिन्युदयानंतरं अलीनां भ्र
मराणां आशा इच्छा मकरंदे उत्थिता उदयं प्राप्ता ॥३॥ ॥कुरवापसारसकाकुरवान् कुरवा
ख्यनगोपि तथा कुरवान् । तेन पंकमलं कमलं कृतवन्न विलोभयितुं कमलं कमलं ॥४॥ ॥कुः भूः
सारसानां काकुरवान् शृंगारालापान् अवाप प्राप पवर्वेण । सः कुरवाख्यः नगोऽपि कुरवाख्य
नगः कुरवनामा नगो वृक्षः । अरुणा भंटी सोप्यं कुरवान् । जात इति शेषः । कमलं कं न रं न विलो
भयितुं अलं समर्थं अपि तु समर्थमेव । कीदृक् । कंजालं अलंकुर्वत् भूषितवत् । कीदृक् जालं । गतः
पंकमलो यस्मात्तत् ॥४॥ ॥अगुरिति सहिमानीतस्ततो पि रविमहांसि गुरुतमो ऽहिमानी
तः । भवनं महिमानीतः स्मरेणापरितः शराख्यमहिमानीतः ॥५॥ ॥रविमहांसि इतस्ततः अगुः प्रा १६

सरन् । अतिशयितः महिमा महत्वं येषां तानि । गुरुतमा वासो हिमानीव । हिमानी हिमसंहतिरित्यमरः ।
पंचम्यर्थे तस् । तस्याः सकाशात् । तामवधिकृत्य तदुपरीत्यर्थः । अन्यच्च । सः मानी नलः परितः सर्वांगेषु स्म
रेण शराख्यमहिं सर्पं आनीतः मदनबाणे दष्ट महिमहः उत्सवः पुष्पप्रकरादिस्तद्भवनं इतः प्राप्तः । त
दुपशांत इत्यर्थ इति शेषः ॥५॥ ॥स्मरस्फूर्तितयाकृ गतः क्षितिस्फूर्तितया भिवद्धिं चंपकमुकुलं । नद
स्फूर्तितया व्यथया निरस्फूर्तितया यया वियुक्तं दंपतिकौ ॥६॥ ॥चंपकस्य मुकुलं कलिकास्म
रस्फूर्तितया मदनस्फूर्तिलन अभवत् । इत्थंभावे तृतीया । किंभूतया । जगतः क्षितो भाविसुष्ठु उर्विताया
म्या तया अनंतरेण जगद्द्वंदः सुकरः । स्फूर्तिर्नाम भेदनशोधनमायसंतं चंपककलिकास्फूर्तिः तया अ
स्फूर्तिज्ञापिता । यया स्फूर्तितमा निबिडया व्यथया कृत्वा । वियुक्तो गतो दंपतिकौ च । स्वार्थे कः । वियु
क्तस्त्री पुरुषो निरस्फूर्तिर्गतप्राणौ जातौ । चंपकमुकुलमालोक्य कौ वियोगिनौ विरहमानौ इतस्ततः

सतप्राणेन स्तः। ततः स्त्रीतिव्यज्यते ॥६॥ ॥ विरलो च पलाशस्य प्रचुरं पुष्पं बभूव वेपलाशस्य। स्म
१७ रनीव पलाशस्य प्राश्य ध्वगपिशितवारु चपलाशस्य ॥७॥ ॥ विरला निर्लोमा निर्ऊर्ध्वेला नि
पलाशानि पत्राणि यस्य तस्य पलाशस्य किंशुकस्य प्रचुरं पुष्पं बभूव। जात्यैक वचनं। अन्यच्च। किंभूतं पु
ष्पं। प्राश्यं आस्वाद्यं तद ध्वगामिनां पिशितं मांसं तद्वचारु। तत्सदृशं। कस्य भक्ष्यं। स्मरएव नीव्रः पला
शः प्रमातस्य पलं मांसं अश्नातीति। किंभूतस्य चपलाशस्य चंचलेच्छस्य ॥७॥ ॥ ऋतौ अधमः
बभ्रुर्निशाह्वयौ विभाविभौ विभौ विभौ। कलौ भ्रतेषु सत्पते रदारदारदारदाः ॥८॥ ॥ ऋतौ
वसते निशाह्वयाः रात्रिनामानो गजाः बभ्रुः रेजुः। रात्रिगजयोः साम्यं। सत्पतेश्चंद्रस्य कलाः त
एव रदाः दंताः किंभूताः अदाराणां स्त्रीरहितानां दारंभेदं ददतीति तथोक्ताः। आतो नुपसर्गे इति १७
कः। गजो यथा दंतैः नरान्दारयति तथा रात्रिश्चंद्रकलारूपैर्दंतैर्दारयतीति भावः। अंतर्द्विपाद यमकं ८
॥ इहेलललनाशोकालिप्रदेनेयेनात्ममोहविनाशोकालि। कामेनाशोकालिस्वनहुंकृतिभिः सदिक्ष्वनाशोकालि
॥७॥ ॥ इह ऋतौ ललनाशोकालिप्रदेन तत्परित्यागात्तस्याः स्त्रियः परं शोकपरंपराप्रदेन येनात्मम
हविनाशः स्वोत्सवभंगः अकालि। लयोरैक्यं। कृतः। सः पुमान् अशोकालिस्वनहुंकृतिभिः अशोक
स्य उपरि भ्रमद्भ्रमरस्वना एव हुंकाराः तैः अकालि। कल बंधने। बद्धः कामेन मदनेन दिक्षु वर्त्तमानः। परि
भ्रमन्नित्यर्थः। अनाशः पुनः स्वगृहं गच्छामीत्याशा वा न विद्यते यस्य इत्थंभूतः या सु दिक्षु परिभ्रमंस्तत्रै
व बद्ध इत्यर्थः ॥७॥ ॥ स्मरस्य युद्धरंगतां रसारसारसारसा। जिता वियोगिनः समुन्नतेन तेन
नेनति ॥१०॥ ॥ भूः स्मरस्य युद्धरंगतां रक्षणास्थलत्वं आप। किंभूता। साराः श्रेष्ठाः सारंगाः प
क्षिणो यस्यां सा। अनेन रवातूर्यत्वमुक्तं। तेन वृत्तेन स्मरेण वियोगिनो जनाः जिताः ते प्रसिद्धाः। किंभू
तेन समुन्नतेन उत्कृष्टस्वामित्वेन। अंतर्द्विपाद यमकं ॥१०॥ ॥ नुन्नमनां मधुनानाश्चयतिस्वति

कोविनांगनांमधनानां। इतिललनामधनाना विधमधयं किलतदर्थनामधनानां॥११॥ ॥म
१८ धनावसंतेननुन्नमनाः परवशः कः पुमान् अंगनां विनाम्हतिं मरणं नाभ्रपति। अत्रविनायोगेद्विती
या। अपितुम्हतिंप्राप्नोत्येव अधनाद अद्येतिचित्ते निधाय ललनास्त्री नाना विधंगोड प्रकारं मध
अधयत्। धेट्पाने। पपो। तदर्थनां प्रियार्थनां अधनानानिराकुर्वती अयं अभिसंधिः। यदाहं ना
नुसरामि तदायं प्राणांस्त्यक्ष्यत्येव अतस्तावन्मद्यं पीत्वा अहंहृतचित्तासती सुखेनैनमनुसरा
मीतिमद्यंपपो॥११॥ ॥पिकोपिकोपिकोपिको वियोगिनीरभर्त्सयत्। वचांसिभंगमालप
न्नितानितानितानिता नितांः॥१२॥ ॥कोपिवनांतरादागतः भंगंरचनाविशेषं इतानिप्राप्तानि
तानितानिप्रसिद्धानि वचांसि आलपन्भाषयन्सन् कोपिको पिकः कोपयुक्तः क्रोधारुणाक्षः पि १८
कः कोकिलः ताः वियोगिनीः स्त्रियः योषितः अभर्त्सयत्। भयंप्रापितवानित्यर्थः। अंतर्द्विपादयमकं १२

आरपिकलापेनप्रवृद्धमाम्रावलीषुपिकलापेन। कलापिकलापेनप्रनर्त्तनमकारिवागपिकलापेन
१३॥ ॥कलाः पातिसः कलापश्चंद्रः तेनश्रीः आपिप्राप्ता। पिकलापेन। कोकिललापेन आम्रावली
षुप्रवृद्धं हृद्धिः प्राप्ता। कलापिकलापेनमयूरसंघेन प्रनर्त्तनमकारि। तस्मनर्त्तनस्यजलदागमस्यैहि
तुत्वात्। कलाम्रंजुलावाकूगीरपिनापेनप्राप्ता॥१३॥ ॥सहकारवृते समयेसहकारंरहणास्यके
नुसस्मारपदं। सहकारमुपरिकांतैः सहकारमणी पुरः सकलवर्णमपि॥१४॥ ॥नुअहोसह
कारवृते नृतयुक्तसमये वसंते रहणास्यके सहकाः सोढाराः अपिनुनकेपि। रहणमिति। रहस्या
गे। अस्माद्धावेल्युट्। अन्यच्च। कारमणी पदमपिसस्मार। किंतत्। पुरः आदोकेसेलवर्णा। कल
इत्येतत्। असस्सहितं। उपरि अंतेसहकारं हकरसहितं। कलहइतिपदं कापिनसस्मारइतिकाकुः
अनेनसुखेनानुसरंतिसर्वाः स्त्रियइत्युक्तं॥१४॥ ॥अधिगतकामधकरागादगम्यैर्भ्रमर

पटुलिकामधरागात्। पीतोकामधरागाद्रुतमकृततत:श्रियोधिकामधरागात्॥१५॥ ॥अधि
१० गताप्राप्ताकामधूर्ययासा। समासेधरोष्ठ। इत्थंभूताप्राप्तमदनधराभ्रमराणांपटुलिकापङ्क्ति:।
अगात्भ्रगंएत्यवृक्षाद्वृक्षंप्राप्यरागात्स्त्रीयापुष्परसंपीत्वाउत्कासती द्रुतंशीघ्रंमधरा:अन्यो
न्यराःगाःवाचःअकृत। ततःकारणात्मधवन्ततःअधिकाःश्रियःअगात्॥१५॥ ॥नसमा
नसमानसमानसमागमनमापसमीक्ष्यवसंतनभः। भ्रमरभ्रमदभ्रमदभ्रमदभ्रमरच्छलतःख
लुकामिजनः॥१६॥ सहकामिनांकामिनांवजनःनाप। कं। मानसंचित्रंतस्यमानोभिप्रायःतेनस
मानःतदनुरूपश्चासौसमागमश्चसंभोगस्तं। किंकृत्वा। वसंतनभःभ्रमदभ्रंवलन्मेघंवीक्ष्य।
ननुवसंतेसत्येवकथंगगनंवलन्मेघंवीक्ष्यइत्याशंक्याह। अरभ्रेति। बकुमदभ्रांतिप्रदभ्रमरमि १०
षेणवसंतोवधितरुप्रसूनाच्छादेन। समासादि। तद्भ्रमरभ्रमेणनकिंमिदंजलधरपटलंमुदि

तमितिशंकामवाप्य अधुनायंवसंतोगतइतिस्वचित्तपरिकल्पितंसंयोगंनापेतिभावः। द्विपादाव्यवधा
नेनयमकं॥१६॥ ॥गतंमत्रनयेननगरहाद्रुदसमुत्तरतांतरंतांतरतांतरतां। परएवविकारइया
यस्तमसंतमसंतमसंतमसंतमसन्न॥१७॥ ॥इरुक्तोयेनपुरुषेणगरहाद्रुतं। कर्मणिक्तः। किं
भूतेन। अतांतंग्लानिरहितंयद्रुतांतरं सुरतादन्यत्सुरतंतस्यभावःतां असमुत्तरता अनन्तुभ
वता। इत्थंभूतेनयेननगरहाद्रुतंतंनरंपरएवमहान्विकारःमूर्छाभ्रमादिलापादिःइयायप्राप।
चहतमं अतिशयेनस्थूलंसंतमसंसवतस्तमःकामाख्यंयस्यतं। क। अंतश्चेतसि। किंभूतोवि
कारः। असन्नअसाध्यः॥१७॥ ॥कुधिकांतवशंनवदामसमापनयापनयापनयापनया
॥तन्मतेनुशयेनवतामरानेरवतारवतारवतारवता॥१८॥ ॥यास्त्रीकुधिकोपेसतिनव
दामसमापनयापनयानवपुष्पमालासमा। तिमेणकालपरिकालनयाकांतवशंपत्यनुसारंनाप

२० तांस्त्रियं तंपतिंविना अवतारवता। उत्पद्यमानेन अनुशयेनपश्चात् आरप्राप। अशनैःशीघ्रं अरवतामो निलं
बतखेदे॥१८॥ ॥नभसो विवरं कुसुमेक्षण भूगतरोगतरोगतरोगतरो। वदकांतमवेक्ष्यय चाद्यम
धाव रमे वरमे वरमे वरमे॥१९॥ ॥का विद्विहि एवं क्षं प्रतिवदति। उड्डत्यहो। अगतरा पर्वतह
स कुसुमनेत्र वांस्त्वंनभसः विवरे अंतरागमं अतरः तीर्णोसि। उद्धइत्यर्थः। हेगतरोगतर अतिशये
नगतरोग निरुक्तर। हे वरश्रेष्ठ। यथायेनप्राकारेण कांतमवेक्ष्य अद्य अधनामधोवसं ते अरमेव
अत्यर्थ रमेवलक्ष्मीरिव रमेक्रीडां करोमि तथा वद अनेन काम्यधवलं द्योत्यते॥१९॥ ॥श्रितेति
गांमनागतस्त्वबंधकामनगतः। परोपनाममनोगतस्तताम कामनागतः॥२०॥ ॥इति अनेन प्र
कारेण गां वा वंश्रिता सती उक्तवती अनागतस्त्वबंधकाः अप्राप्तस्त्वभर्त्तका परास्त्री मनाकु किं विदिद
मिति अतः अस्मात्। अगतः वृक्षात्गांनाप। गामिति पदस्य डमरुकमणि वदुभयत्रसंबंधः। नामप्र २०

सिद्धं। कामनागतः मदनसर्पात् ततमजग्लो। अत्र प्रलापोन्मादमौनाख्यास्तिस्त्रवस्थाः कथिताः॥२०॥
॥ ॥कालल नादिवसंतं कुसुमशरमसोढ्दृष्ट्वानादिवसंतं। अलिभिरनादिवसंतंदृष्ट्वाय त्रात्मनो
र्थनादिवसंतं॥२१॥ ॥कालल नानंदिवसंत तस्मिन्दिने। कालाध्वनोरिति द्वितीया। कुसुमशरं अ
सोढ। नकपि। अनादिचिरं। हृदि वसंतंतिष्ठंतं। यत्रयस्मिन्दिवसे संतंसाधुं वसंतं दृष्ट्वा अलिभिःना
दः कृतः। कस्मादिव। आत्मनः अर्थनात् याचनादिव। योयमेषांनादः सो भ्यर्थनवा गित्यर्थः। अर्दना
दितिपाठः। अर्दनान्मानना द्वेतोस्तनुमित्यर्थः। आत्मशब्देन वसंतपरामर्शः॥२१॥ ॥स्वय
मर्थमंदारितयायुक्तोयुक्तेनलः समंदारितया। आरामंदारितयामदेनबोधियायादुत्तमंदारितया
॥२२॥ ॥अथमंदारितया कल्पतरुमत्वेन युक्तमुत्तममारामंस्वनलः प्राप। कीदृशः मंदारितया
अल्परात्रुत्वेनयुक्तः मदेन नदीरितया बुध्या उपलक्षितः दारितयास्त्रीयुक्तत्वेनच॥२२॥ ॥

२१ अनुव्रतासमाननंसमाननंदंभीमजा। तमिंदुनासमाननंसमाननंदनैवने॥२३॥ ॥माननाएजना
तासहितंइंदुनासमाननंसदृशंमुखंतं अनुव्रताभैमीसमाननंद। क। नंदनसदृशेवने आरासे॥२३
॥ ॥इहंरूशिरामावलयस्वदृशामितिपृथक्प्रियस्यरामावलयं। प्राप्तारामावलयस्फुरोगिरो
यदुदरेभिरामावलयः॥२४॥ ॥इहारामेरुचिरांस्वदृशंअवलयप्रवर्त्तयइतिपृथकप्रियस्यास्व
पत्युःगिराआरामावलयः स्त्रीणांपंक्तयःप्राप्तारामाजाता। प्राप्तोपवनाः। वलयेनस्फुरंतीतितथा। पा
सामुदरेअभिरामाः वलयस्त्रिवलयः॥२४॥ ॥नवकुसुमाननमनागोगंतुंनैछत्परासमानम
नागाः। अजनिपुमाननमनागाश्रित्यसत्कुसुमदानमाननमनागाः॥२५॥ ॥नवकुसुमेराननम
ननमत्वंयेषांतेतथोक्ताः अगाः वृक्षाःयत्रएवंविधाःभुवःपराअपरास्त्रीसाहंकारमनाःगंतुंनेछत्।
अन्यत्र। सत्कुसुमदानमेवमानः तंआश्रित्ययत्साधकपुष्पप्रदानसमाननांकृत्वाअमनाकृअति २१

रायेनैवपुमान् अनागाःनिरपराधोजनिअभवत्। यदिभवतीपुष्पप्रदानलक्षणंमानंआश्रित्य
यत्साधकनाया। तितर्हिमयैवपुष्पाणिआहृतानित्वंगृह्णीष्वेति आत्मापराधंनिवर्त्तयितवानिति
भावः॥२५॥ ॥रुषितंसखिसादमसुष्यलसत्तनुतेतनुतेतनुतेतनुते। ननवाननवाननवा
ननवागिहतेवरणेम्टतिमिष्यतिसः॥२६॥ ॥त्वत्तीयेनान्वयः। सखीकुपितांनायकांप्र
नुनयति। हेलसत्तनुतेतनुते। राकुमानशरीरकलेनइतनुतेप्राणास्तवे। सखितेरुषितरोषःअ
मुष्यलसतेः। अतनुअनल्पंयथातथाखेदंतनुते। सःइहअस्मिन्नतेवरणेम्टतिंनएष्यतिइति
न। अपितुएष्यत्येव। अवाकूमोनीअनवाकूउन्मादवत्तयाप्रलापवान्। स्त्रीमुखंवाननंप्री
तिकरत्वात्। आननंमुखंतद्वान्॥२६॥ ॥अपिवैत्यनगाननत्ता। मवतानवतानवतास्तन
रानुधना। इहसोस्यमगोवरमावरमावरमावरमास्यनरम्यतरा॥२७॥ ॥अपिवअन्य

२२ वा। अवतानवता। विस्तारवतां मध्ना। वसंतेन अगान् तरून् एत्य प्राप्य बत हो। बतयोरैक्यं। तेन नृपमक
भंगः। नवतां नूतनत्वं नास्तितरान् अतिशयेनत्यक्ता इतिमत्वा। अगोचरं। गोचराः इंद्रियार्थाः षट्
रूपरसगंधस्पर्शशब्दसुखाख्याः तद्रहितमसौख्यविषया दोसीन्यं मावरमा प्राप्नुहि। अस्य अं
तोः वरमापश्चात् रमाशोभा नरम्यतरा मनोहरतमा न भवति॥२७॥ ॥इति लालिकया
लिकया तकवैरतिकालिकयालि कयाकलिता। दयितं समयासमयाद परा व्यहरत् समयास
मयाववतया॥२८॥ ॥इति प्रकारेण आलिकया सख्या कलिता उक्ता सती अपरा स्त्री दयि
तं समया प्रियस्य समीपं समयात् आगमत्। सखिविशेषणं। अतिकालिकया। अतिशयेन का
ल्याकृल्पया। स्वार्थे कः। कैः। अलिकयातवकैः। ललाटपतितकेशैः लालिकया विलासवत्या। इत्थं २२
भूतया सा दृक्षं अधः बोधिता नायका प्रियसमीपमगमत्। मयालक्ष्म्यासदृशा तया सा सः व्यहरत॥२८॥

अतिरुचिमानस्तवकैः सरस्तटोयं क्रीयमानस्तबकः। इहखलुमानस्तवकः। प्रियामितिवरोनयत्समान
स्तबकः॥२९॥ ॥अयं सरस्तटः हे प्रिये सरोवरतीरं अतिशयेनरुचिमान् कांतियुक्तः तथा अ
स्ताः गताः वकाः यस्मात्। हस्तप्राप्यपुष्पस्तबकः। दृश्यते इतिशेषः। अतः कारणात् तवकः इह क्री
डाविरोधायमानः। एतदुक्तो समानस्तबकः। स्वार्थे कः। सहमानस्तिष्ठति यां वर्तते इत्थं भूतः परः पु
मान् प्रियामनयत्। आरामं प्रतीतिशेषः॥२९॥ ॥अरुणतरपरागस्य प्रसवं प्रेक्षिस
न पुनरपरागस्य। हसितेरपरागस्यस्वेस्तिष्ठत्यपि लवे पुरपरागस्य॥३०॥ ॥अपरा अन्या अ
रुणतरः पुष्परजो यस्य तस्यापरागस्य वृक्षस्य प्रसवं पुष्पादिं न प्रेक्षिष्ट। लवेषु पल्लवानादनो द्री
अस्य तरोः अपराकुसुमं सुखी तिष्ठत्यपि प्रसवादर्शनं। हेतुगर्भविशेषणं। स्वेः हसितेः अपरागस्य
निवर्तिताऽरुणत्वस्य। पुष्पादेः शुभ्रत्वात् हसिततस्यापि तथात्वदर्शनं॥३०॥ ॥अवस्थप

२३ लवालयानगान्विद्रुतालवालया। लतातयेववालयावभेन्ययावबालया॥३१॥ ॥यालता
लानवोढाऽस्त्रीववाल। वलसंवलने। क्विवारा वनेइतिशेषः। तथावतया अन्ययावालयावभेरजे
कयेव। लतातयेवलतावल्ली तन्न्नवेनैव। लताभयैर्ति पाठः। उभयोःसाम्यमाह। श्रितमालवा
लंदृष्टसम्यलेऽसलधारायया सा। पुष्पाद्यव ×वै× वयाप्यलतापित्तस्फलोद्गमादेव। किंकृत्वा।
पल्लवाधारांस्तरूनवलोक्य। यत्रबहुपल्लवाविधृतेतत्रगातिलतापिपल्लवयुतंघनच्छायंत
स्माश्रयति॥३१॥ ॥व्रततीनामालीनांमध्येन्योव्यधिनुतागनामालीनां। अप्येनामा
लीनांस्मितान्वजानन्मरग्रुनामालीनां॥३२॥ ॥व्रततीनांलतानांआलीनांपंक्तीनां
मध्ये आलीनांगुणांगनामेनां अन्यः नामव्याजेनव्यधिनुतप्रेक्षत। किंकुर्वन्। आलीनांस्मिता २३
त अलीनांभ्रमराणांमदात्त्वर्षांव्रजानन्नपियत्र छायातरूणांतत्रभ्रमराःसुगंधिवंऽस्वंद

नमद्गमदादिहेतोरापतंतीति॥३२॥ ॥किमितःकलुषाक्षिसुरवार्थमभागपरागपरागपरा
गपरा॥स्थितयेव तयेवदृतःसपुमान्नकुयाननयानन्नया ननया॥३३॥ ॥अपरास्त्री आग
परागपरावृक्षपुष्परजः आदनासतीपरागसंयोगेन कलुषस्या क्ष्णःपरागापनयं तद्वारासु
रवार्थं पुरःस्थितयैव अनयापुमान्नहृतइतिन। अपितुहृतः॥३३॥ ॥समनेनसमा
यतयाव्यधितागस्तएव कश्चनसमायतया। ऋजुमानसमायतया तस्मेन क्रोधिजीवनसम
यतया॥३४॥ ॥कश्चनपुमान्स्त्वं अनेनसंनिरपराधं आयत आसमायतपाशयितया
सःकूपटलेनव्यधितचकार। अन्यत्तु तस्मेसमायत्वेननिरागसेजीवनसमायप्रियायतया
नाक्रोधिनकुपितं। ऋजु अकुटिलंमानसं आयतयाप्राप्तया। आङ्कूरक्तप्रादाविति॥३४॥ ॥
॥ अभवदनेनानाविस्मयदोन्योमानिनिजनेनानावि। अतिसुजनेनानाविस्खलनेतद्युपव

२४ नमनेनानावि॥३५॥ ॥अन्यः जनः मानिनिजने विषये अनेना: निरपराधः सन् विस्मयदो
विस्मयकरो भवत्। यद्यस्मात्कारणात् नानाविनानाविधपक्षिपुंस्कं उपवनं अतिसुजनेन
अनेन। अनाविस्क्तं। कथं। अनाविस्खलनं अप्रकट स्खलनं यथा तथा। तत्कामिनीक
रकंकणारणत्कारपराभूतभ्रमरहुंकारसरससहकारपल्लवास्वादनमधुरतरविरहिजन
हृदयदूरवमर्मभेदिकुहूरवकोकिलमुपवनमित्यादि उपवर्णनं यत् ततःकारणात् अ
नेनाः अभवदिति संबंधः॥३५॥ ॥जनादसौःसमानतःपदाहतिंसमानतः। परोदधो
समानतः स्वमूर्ध्नि भासमानतः॥३६॥ ॥भासमानतो विराजमानात्समानतः
साहंकारात् असौः प्रणयसमानतः तुल्यात् स्त्रीजनात्सकाशात्सम्यग् आनतःसन् परोन्यः २४
स्वमूर्ध्नि पराचरणेन हतिं आघातं दधौ बभार॥३६॥ ॥तनुच्छटोत्तमालयातया

भुवोत्तमालया। अहारि शीतमालया निलावधूतमालया॥३७॥ शीतःमालयो मलयसंबंधी
यः अनिलःतेन अवधूताःमालाः यत्र तथाभूतया उत्तमालक्ष्म्या। भुवा उपवनभूम्या। उत्त
माः अलयाः प्रियाः यस्याः सा तनुच्छटा स्त्रीततिः अहारि हृता।३७॥ ॥श्रितलसदारा
माभिःप्राप्यजनो रतिमथोदारा माभिः। आरादारामाभिःस्फुरितसरोजं सरस्तदारामाभिः
॥३८॥ ॥अथ जलक्रीडा। श्रितः लसन् आरामो याभिस्ताभिःसह उदारां रतिं क्री
डां प्राप्य। अथ सविलासि जनः आभिः रामाभिः अमासह आरात् समीपे वर्तमानं अभिस्फुरि
तकमलं सरः तदा आर आप॥३८॥ ॥किमपःसरसीमायात्वंधामगुणाम्हतप्रसर
सीमायाः। द्रुतमिति सरसीमायात्स्य क्रोभैम्यपि लःसरसीमायात्॥३७॥ ॥यात्वंगुण
एव अम्हतं तस्य प्रसरः विस्तारः तस्य सीमा अवधिः तस्याः धाम स्थानं सा त्वं इमाः अपः सरसि।

स्तगतो। गमिष्यसि इत्युक्त्वा ड़ुंडपी प्रंसः मायात्यक्तः निःकपटः रसी शृंगारवान भैम्या सह सरसीं
२५ सरः आयात आगमत॥ ३९॥ ॥ गतपंकाः सारस्यः श्रियो अस्य जङ्कुर्मनोधिकाः सारस्यः अ
पिको काः सारस्य स्थिताः कुर्यश्च हंसिकाः सारस्यः॥ ४०॥ ॥ सारस्य सार्भूतस्य वलयु
क्तस्य नलस्य मनः निषद्मा अधिकाः गभीरोदकाः सारस्यः सरः संबंधिन्यः प्रियः जङ्कुः हृ
तवंत्यः। सारस्यः रसभावः रागित्वं तत्रास्थिताः मनोहराः वाकोकाः चक्रवाकाः अपि कुर्यः हं
सिकाः सारस्यः सारसांगनाश्च मनो जङ्कुः॥ ४०॥ ॥ कास्पतिरस्तमिताभिः स्फुरमदि
रियं तु विहृतिरस्तमिताभिः। अनतितरस्तिमिताभिः कमेत्य यद शंकि धृतिभिरस्तमिताभिः
॥ ४१॥ ॥ अस्तं त्याग इत्ताभिः प्राप्ताभिः धृतिभिर्धैर्यैरुपलक्षिताभिः ताभिः स्त्रीभिः कं २५
उदकं एत्य प्राप्य इत्य शंकि। आतर्कि। किंभूतं कं। न अतिशयतरसः अतिशयितवेगा स्तिमयोत्र। तत्

तत्कथं अशंकि। यद्यस्मात्कारणा अस्तिमिता। अनिभृताभिः अस्तमिताभिः अगामिभिः
अधिः निश्चितं इयं विहृतिः विहारः अस्ति। तत्तस्मात्कारणात् अस्माकं का स्थितिः न कापि।
गाधत्वान्निर्भयविहारेनावत्सो रव्यमेभवतीति॥ ४१॥ ॥ अलिमिलत्परागतः स
रोरुहात्परागतः। मुखं नतापरागतस्तदीयमापरागतः॥ ४२॥ ॥ भ्रमरैः संभृतपरा
गात् कमलात् नितं तः सन्नतदीयं स्त्रीसंबंधिमुखं तदा आपरागलोहितत्वात्। अपरा
गतः अपगतः रागोलोहित्यं यस्मात् इति सरोरुहविशेषणं॥ ४२॥ अथ कामानलिनीनां
स्त्रीणां संघेर्मनोरमानालिनीनां। विधुततमानालिनीनां पंक्तिर्वितता न संभ्रमादलिनीनां
॥ ४३॥ ॥ अथ नलिनीनां पद्मिनीनां पंक्तिः आलिनीनां भ्रमरीणां संभ्रमाद्भयात् वि
३८ ततायेन। किंभूता। कामानलिनीनां कामानलयुतानां नलयुतानां स्त्रीणां संघैर्विधुततमारभ्या ४३

२६ सरःश्रियोंतरंगगतः सरोजन्म तरंगगतः। भयंगतो महत्तरं तत्र जनस्तरंगगतः॥४४॥ ॥सरः
श्रियः अंतरंगगतः मध्यंगतः सरोजानां त्यरंगगतः तरंगीभूतात् तरंगतः जलकल्लोलात् स्त्री
जनः महत्तरं भयं प्राप्तः॥४४॥ ॥अथ नीत्सारसतः फेनपरीता द्युपांबरा त्सारस
तः। अभिमुखरात्सारसत त्तीरमिता स्त्रीतति श्चिरात्सारसतः॥४५॥ ॥अथसारस
तः सरःसंबंधिनः फेनपरीतात् व्याप्तात् सारसतः। तृतीयार्थेतस्त्र। सारसैः कृत्वा अ
भिमुखरात् इत्थंभूतात् स्त्रीरा त्सारस्त्री ततिः नीरार्द्रवसना प्रीत्या तीरं इता प्राप्ता। कस्मा
त्। अंबरा यथा गगनादिव यथा। किंभूतात् सारसतः। सप्तानि संति नक्षत्राणि यत्र।
फेनवारित्वात् नक्षत्राकाशसाम्यं॥४५॥ ॥सवोदयावलीनतः समुत्प्रभाव
लीनतः। अनोप्ययावलीनतः पदं जनो वलीनतः॥४६॥ ॥सचस्त्रीजनः वली २६

भिः नतः नम्रः अलीनतः अलीनां भ्रमराणां तदाधारत्वात् स्वामिनः अतः अस्मात् सरसः सकाशात्
स्वपदं स्थानं ययौ। समुत्स हर्षः कस्मात्। प्रभावलीनतः प्रभावलीनां इनतः रवेः किंभूतात् उद
यावलात् सकाशात् अलीनतः अस्तं गंतुमिच्छतः। सायाह्नेत दुत्सवात्। यद्वा। उदयस्थानात्
ईनतो रवेः समुत् उत्थिता प्रभावली यस्य तत् पदं॥४६॥ ॥दिशकामानंगेहल्लनो मदने
षु विकृतिमान्नंगेहं। इति परमानंगेहं नलः प्रियामनयदिति विमानं गेहं॥४७॥ ॥अंगेहे
प्रिये अहं अंगेदेहे मदनेषु विकृतिमान् स्मानः अतः कारणात् कामान् रतोत्सवान् दिशदेहि। इह
गृह इत्युक्ता नलः प्रियां दमयंतीं गेहं मनयत्। किंविधं गेहं। परमानंगेहं परमा उत्कृष्टा अनंगे
हा नंदनादिः यत्र। विमानं अतीवबर्तते। तद्गृहमनयदिति संबंधः॥४७॥ ॥अरुणमह
स्तेनेन प्रापि वसोऽनेर्गुणग्रहस्तेनेन। अत्र हस्ते नेनस्फुरमस्याहित ग्रतं उहस्तेनेन॥४८ ॥

३७ अनेनसूर्येण अरुणमहस्तांलौहित्यतेजस्त्वंप्राप। स्वरतिपूर्वैःगुणैःग्रहःगुणाःलौहित्यंतस्यस्वी
कारःकमलैर्नतेनेनविस्तारितः। रविरश्मिरागसातिसाम्यंतङ्गागंभोरकत्वात। स्फुटंनिश्चितं।
कस्मिन्सति अस्य अंशुहस्तेतमतेकमलप्रविष्टेसति। हिं इहात्रहिकारणापेक्षा ॥४८॥ ॥
यतोयतोयतोयतोरवेर्मरीचिसंचयः महांधकारसंचयस्ततस्ततस्ततस्ततः ॥४९॥ ॥
यतःयतःयस्माद्यस्मात्स्थानाद्यतोयतोरवेःमरीचिसंचयःयतःनिरुद्धःततःततस्तस्मिन्
तस्मिन् ततःअनंतरंमहांधकारसंचयःततोविसृतः ॥४९॥ ॥छादितरवितानेनमा
पितकालेनसस्वरवितामिन। जितरुचिरवितानेनव्योमानुस्फुरितमुडुभिरवितानेन ॥५०
॥ ॥तेनकालेनसायंसमयेनछादितरवितालुप्तसूर्यत्वंप्रापितं। सस्वराणिसरवाणिवी २७
नांपक्षिणांवितानानिसमूहाःयत्र। अन्यच्च। जितरुचिरंवितानंजनकायेनतेनव्योम्नाव
स्फुरितं। उडुभिःनक्षत्रैःकृत्वा अवितानेन अम्लानेन ॥५०॥ ॥अथोद्यतोंबुराजतःश्रियंख
मापराजतः। यथाघटोच्यराजनस्मराग्रगःसराजतः ॥५१॥ ॥अथचंद्रोदयः। अथसूर्यास्त
मयानंतरंअंबुराजतःसमुद्रात् उद्यतःउदयंनिर्गच्छतःराजतःचंद्रात्खंनभःश्रियंप्राप। राज
तःरूप्यमयःघटःयथातथाच्यराजत। स्मरस्यअग्रगःअभिषेकार्थं ॥५१॥ ॥प्रदंतं
कालंकालं कालं कालंवियोगिनीशशिनंतं। अध्वगकालंकालंकालंकालिसमीक्षितुंप्रोद्यंतं
॥५२॥ ॥अध्वगानांकालंमासंरलयोरैक्यात। कालंकालंकृत्वाप्रोद्यंतंशशिनंचंद्रंसमी
क्षितुंकावियोगिनीअलंसमर्था। नकापीत्यर्थः। कालंकःअलंकमयःअलंकारःकलंकाकालंका
लःभूषणंतेदधतंकालंकृष्णवर्णं ॥५२॥ ॥क्षरत्तुषारसीकरास्ततोविजृंभिरेकराःजग
त्सुशार्वरीकराःप्रबुद्धचारुकैरवाकराः ॥५३॥ ॥क्षरत्तुषारसीकराःस्रवद्धिमकिरणाःशर्वरी

२८ करस्य इमे किरणाः ऊगत्सु विजृंभिरे प्रकटी बभूवुः। प्रबुद्धाः विकचाः कैरवाणां कुमुदानां
आकराः येस्तेत्त तोनंतरं ॥५३॥ ॥वध्वस्ततोनुनिन्यिरे नयेनयेनयेनयेनये। वशंनरोनय
त्समुन्नतेन तेननिनतेन ॥५४॥ ॥येनरः पुरुषाः येनयेननयेनमीत्याः वध्वः स्त्रियः अनु
निन्यिरे अनुनीतवंतः तेनतेननयेन वशं अनयत्व। अधीनाः कुर्वंतिस्म। कथंभूतेन
समुन्नतेन उपचितेन न्योत्र अनुनीतिप्रकारः तेन ॥५४॥ ॥सहासहावमादरेसहा
सहाः स्मरस्यते। सुरासुराव्ययान्तेसुरासुरागमादधः ॥५५ ॥अथमधुपानं स्मरस्यत्र
सहाः सोढुमसमर्थाः ते पुरुषाः सहासहावंहासोहास्यं हावाः लीलाः ताभ्यां सह यथा
तथा आदरैः प्रीत्या सह सुरासु मदिरासु रागं प्रीतिं आदधुः। सुरासुराः अन्तेतथा २८
५५॥ ॥मधुप्रपीयवाभवन्नतानतानतानताः रमारमारमारमाकुले जनेत्रहालया ॥५६॥

तेनर इति पूर्वसमुच्चयार्थश्चकारः। मधुप्रपीय। पाङ् पाने। पीत्वा अतानाः विस्तृतं मंजुलं यत्ताम ऊं
तस्वरस्य यत्र परिच्छेदः। तस्यभावः अतानतान ता तस्यां नताः नम्रा इत्यर्थः अन्यत्र हालया सुरया
आकुले आघूर्णिते अत्र कामिनीजने अरं अत्यर्थमरं रमाः श्रीः आरप्राप ॥५६॥ ॥भ्रमरेः प्राग
स्तानिप्रपीयवमधूनिसानुरागस्तानि। दत्तनिरागस्तानि प्रापवशयनं जनस्त्वरागस्तानि ॥५७
भ्रमरैः अस्तानि मधूनि पीत्वा सानुरागः जनः नरस्त्रीजनः त्वरागः शीघ्रगः तानितारं नां विस्त
रः नद्यक्तंतानिशयनं प्रापच। किंविधानि मधूनि। तानि प्रसिद्धानि दत्ताहत्तानिरागस्तानि
रपराधत्वं येस्तानि। गोत्रस्खलनादीनपराधान्मधुमत्ताः स्त्रियोनावमंन्यंत इत्यर्थः ॥५७॥
॥ ॥ससमुद्रमहेलाभिस्फुरितगुणादिः स्ततः परमहेलाभिः श्रीः प्रवरमहेलाभिस्त
थेव सुवर्णपंक्तिभिः स्मरमहेलाभिः ॥५८॥ ॥ततोनंतरं समुद्रसहितामहतीइलाभूमि

२७ स्तस्या आभिस्फुरिताः गुणाः यासां ताभिः प्रवरमहेलाभिः श्रेष्ठस्त्रीभिः स्मरमहे मदनोत्सवे श्रीः शो
भा अलाभि प्राप्ता। पुनः कथंभूताभिः। परमहेलाभिः परमा श्रेष्ठा हेला लीला यासां ताभिः। तथै
वयुवपंक्तिभिः पुरुषसंघैश्च श्रीः शोभा लाभि प्राप्ता॥५८॥ ॥अदूरवस्थितैः प्रियैः सु
दूरवक्राः कृताः अदूरवक्रका सिरे अदूरवः स्तनानखैः॥५७ ॥अधरतोत्सवः। अदूरवस्थि
तैः अतिसमीपवर्त्तिभिः वक्षिभा भुरिरलोपः। प्रियैः पतिभिः स्त्रियदृत्यर्थालभ्यते। सुतरां दूरवक्रा
काः कृताः। त्यक्तवस्तनाः कृताः अदरवः स्निग्धाश्वते उरवश्च स्थूलास्तासां उरवः वक्षसिरे बभुः
नखैः स्तनः॥५७॥ ॥इह भासिताराबलयश्रितइवनन्ते कृताव तारावलयः। वक्षसि
तारावलयस्वनानिपेतुश्च हारताराबलयः॥६०॥ ॥विपरीतं रतं वर्ण्यते। भणितं र
तिकूजितं स एव आरावः आलापः स एव लयः नन्त्वगीतवाद्यसाम्यं तेन श्रितं मुक्तं तस्मिन् इह स २७